# Rishigautamaproktah Rudra Stava

# ऋषिगौतमप्रोक्तः रुद्रस्तवः

## Document Information

Text title : Rishigautamaproktah Rudra Stava

File name : RRiShigautamaproktaHrudrastavaH.itx

Category : shiva, shivarahasya, stava

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 22-63||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# ऋषिगौतमप्रोक्तः रुद्रस्तवः

(शिवरहस्यान्तर्गते उग्राख्ये)

**गौतमः**

यो वै रुद्रः स भगवान्ब्रह्मा साक्षान्महेश्वरः ।
सर्वतन्त्रस्वतन्त्रश्च तस्मै वै ते नमो नमः ॥ २२॥

यो वै रुद्रः स भगवान्विष्णुब्रह्मादिवन्दितः ।
यश्च ब्रह्मा महारुद्रस्तस्मै वै ते नमो नमः ॥ २३॥

यो वै रुद्रः स भगवान्पार्वतीरमणः प्रभुः ।
यश्च विष्णुर्विरूपाक्षस्तस्मै वै ते नमो नमः ॥ २४॥

यो वै रुद्रः स भगवान् या चोमा परमेश्वरी ।
उमाकान्तो निर्गुणोऽपि तस्मै वै ते नमो नमः ॥ २५॥

यो वै रुद्रः स भगवान् यश्च साक्षाद्विनायकः ।
यश्च नित्यो व्यापकश्च तस्मै वै ते नमो नमः ॥ २६॥

यो वै रुद्रः स भगवान् यश्च स्कन्दः सुरार्चितः ।
यश्च साक्षाज्जगत्कर्ता तस्मै वै ते नमो नमः ॥ २७॥

यो वै रुद्रः स भगवान् यश्चेन्द्रः स्वर्गपालकः ।
यश्च स्वर्गप्रदो नित्यं तस्मै वै ते नमो नमः ॥ २८॥

यो वै रुद्रः स भगवान् यश्चाग्निस्तेजसां निधिः ।
यश्च तेजोमयः साक्षत् तस्मै वै ते नमो नमः ॥ २९॥

यो वै रुद्रः स भगवान् यश्च सूर्यो मरीचिमान् ।
यश्च ग्रहगणाधीशस्तस्मै वै ते नमो नमः ॥ ३०॥

यो वै रुद्रः स भगवान् यश्च चन्द्रस्तदात्मकः ।
चन्द्रकोटिसमप्रख्यस्तस्मै वै ते नमो नमः ॥ ३१॥

यो वै रुद्रः स भगवान् भूर्भुवःस्वःप्रभुश्च यः ।
यश्च भूमेः समुद्धर्ता तस्मै वै ते नमो नमः ॥ ३२॥

यो वै रुद्रः स भगवान् यस्तु नित्यो भुवः प्रभुः ।
भुवो यस्तु समुद्धर्ता तस्मै वै ते नमो नमः ॥ ३३॥

यो वै रुद्रः स भगवान् नित्यो यश्च सुवः परः ।
यश्चैव स्वपतिः सत्यं तस्मै वै ते नमो नमः ॥ ३४॥

यो वै रुद्रः स भगवान् नित्यो यश्च महः परः ।
महतोऽपि महान्यस्तु तस्मै वै ते नमो नमः ॥ ३५॥

यो वै रुद्रः स भगवान् नित्यो यश्च तपः परः ।
तपोरूपोऽपि यो देवस्तस्मै वै ते नमो नमः ॥ ३६॥

यो वै रुद्रः स भगवान् नित्यो यश्च जनः परः ।
यश्च नित्यं जगद्व्यापी तस्मै वै ते नमो नमः ॥ ३७॥

यो वै रुद्रः स भगवान् यश्च सत्यं सदात्मकम् ।
सत्यस्वरूपः सत्यं यस्तस्मै वै ते नमो नमः ॥ ३८॥

यो वै रुद्रः स भगवान्यश्चापस्तन्मयः परः ।
यश्चापां जनको भर्गस्तस्मै वै ते नमो नमः ॥ ३९॥

यो वै रुद्रः स भगवान् यश्च तेजः प्रकाशकम् ।
भासा यस्य विभात्यर्कस्तस्मै वै ते नमो नमः ॥ ४०॥

यो वै रुद्रः स भगवान् यश्चवायुः सुशीतलः ।
यश्च वायोश्च जनकस्तस्मै वै ते नमो नमः ॥ ४१॥

यो वै रुद्रः स भगवान् यश्चाकाशः सदात्मकः ।
यश्चाकाशादिजनकस्तस्मै वै ते नमो नमः ॥ ४२॥

यो वै रुद्रः स भगवान् यश्च प्राणस्तदात्मकः ।
यस्य प्राणमयो नित्यस्तस्मै वै ते नमो नमः ॥ ४३॥

यो वै रुद्रः स भगवान् यश्चकालः कलात्मकः ।
यश्चकालकलाधारस्तस्मै वै ते नमो नमः ॥ ४४॥

यो वै रुद्रः स भगवान् यश्च साक्षाद्यमः स्वयम् ।
यमस्यापि नियन्ता यस्तस्मै वै ते नमो नमः ॥ ४५॥

यो वै रुद्रः स भगवान् यश्च मृत्युर्विषाददः ।
यश्च मृत्युञ्जयः साक्षात्तस्मै वै ते नमो नमः ॥ ४६॥

यो वै रुद्रः स भगवान् यश्चामृतमनामयम् ।
अमृतात्माऽमृतं यश्च तस्मै वै ते नमो नमः ॥ ४७॥

यो वै रुद्रः स भगवान् यश्च भूतगणेश्वरः ।
प्रमथाधिपतिर्यश्च तस्मै वै ते नमो नमः ॥ ४८॥

यो वै रुद्रः स भगवान् यश्च सर्वचिदात्मकम् ।
यः सर्वप्रभुरीशानस्तस्मै वै ते नमो नमः ॥ ४९॥

यो वै रुद्रः स भगवान् यश्च सत्यं ऋतं परम् ।
यश्च सत्याभिधं ब्रह्म तस्मै वै ते नमो नमः ॥ ५०॥

यो वै रुद्रः स भगवान् यः परं ब्रह्म निष्कलम् ।
यश्च नित्यं चिदाकारस्तस्मै वै ते नमो नमः ॥ ५१॥

त्वमेव विश्वरूपोऽसि ब्रह्मैकस्त्वं महेश्वर ।
एकत्वादिपरार्धान्तस्त्वमेवासि सदाशिव ॥ ५२॥

अधश्चोर्ध्वं च मध्यं च त्वमेवासि महेश्वर ।
शान्तिः पुष्टिश्च तुष्टिश्च त्वं हुतं चाहुतं शिव ॥ ५३॥

त्वं हि विश्वमविश्वं च दत्तं चादत्तमेव च ।
त्वं कृतं चाकृतं शम्भो त्वं परं चापरं प्रभो ॥ ५४॥

परापराणां परम पवित्रोऽसि महेश्वर ।
परात्परतरो यश्च तत्परात्परतोऽसि च ॥ ५५॥

सर्वस्रष्टा च भगवान् त्वं हि सर्वस्य रक्षकः ।
त्वमेव भगवन् शम्भो सर्वसंहारकारकः ॥ ५६॥

हन्तासि नरसिह्मस्य त्वमेवासि कृतागसः ।
हरेरपि नियन्ता त्वं तथैव ब्रह्मणोऽपि च ॥ ५७॥

परं ब्रह्म त्वमेवासि निर्विकार निरञ्जन ।
निष्कलो निष्क्रियः शान्तस्त्वमेवासि शिव प्रभो ॥ ५८॥

त्वत्त एव समुत्पन्ना विष्णुब्रह्मादयः सुराः ।

त्वयैव पालिता लोकास्त्वयैवैते विनाशिताः ॥ ५९॥

त्वया व्याप्तमिदं सर्वं ब्रह्माण्डं स चराचरम् ।
त्वमेव व्यापकः शम्भो सर्वस्य जगतः प्रभुः ॥ ६०॥

त्वमेव स्वर्गफलदस्त्वमेवास्यपवर्गदः ।
त्वमेव सर्वलोकानां पूज्यो मुक्त्यर्थिनां प्रभो ॥ ६१॥

गतिस्त्वमेव लोकानामगतीनां गतिः परा ।
त्वदन्या न गतिः शम्भो सच्चिदानन्दविग्रह ॥ ६२॥

वेदैरपि न ते रूपं ज्ञातमस्ति महेश्वर ।
किमन्यैर्मादृशैरीश प्रमाणविषय प्रभो ॥ ६३॥

॥ इति शिवरहस्यान्तर्गते ऋषिगौतमप्रोक्तः रुद्रस्तवः सम्पूर्णः ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २३। २२-६३॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 22-63..

Notes:
Tells Pārvatī पार्वती about the Vṛddhācālakṣetra वृद्धाचलक्षेत्र and the River MaṇiMuktā मणिमुक्ता that flows through it - having multitudes of Bilva Trees बिल्ववृक्षाः along its banks. He highlights the merits of bathing in that river and worshiping Him in that kṣetra क्षेत्र as Vṛddhācāleśvaraवृद्धाचलेश्वर.
Ṛṣi Gautama ऋषि गौतम eulogizes Rudra रुद्र (at Vṛddhācāleśvaram वृद्धाचलेश्वरम्) as The One Present in and Source of all that exists. He is the One who is revered by all deities including Viṣṇu विष्णु, Brahmā ब्रह्मा, Skanda स्कन्द et al. He is the One who manifests in The Sun and The Moon, in the Saptalokāḥ सप्तलोकाः viz., Bhūḥ भूः, Bhuvaḥ भुवः, Suvaḥ सुवः, Mahaḥ महः, Janaḥ जनः, Tapaḥ तपः and Satyaṁ सत्यं. He is The One Existent in the Tattva-s including Vāyu वायु, Teja तेज, Ākāsha आकाश; and The One who propels the Highest Principles of Satyaṁ सत्यं and Ṛtaṁ ऋतं.
In a similar composition - Devakṛtopaniṣatsāra Rudrastavaḥ देवकृतोपनिषत्सार रुद्रस्तवः in ŚrīŚivaRahasyam श्रीशिवरहस्यम् . Māheśvarākhyaḥ माहेश्वराख्यः Prathamāṃśaḥ प्रथमांशः . Adhyāyaḥ 54 अध्यायः ५४; Deva-s देवाः eulogize The One Who Exists in All Worlds, Places, Things, Elements, Directions, Events, Beings, Times, as propounded in The

Upaniṣat उपनिषत् - the mystery that rests underneath the external system of things. The link to the same is also given below.

Proofread by Ruma Dewan

*Rishigautamaproktah Rudra Stava*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*